श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

पी-एच.डी. प्रवेशपरीक्षा-२०२३

(Ph.D. Enterance Test-2023)

प्रश्नपत्रे विभागद्वयम् अस्ति

B

## द्वितीयो विभागः

| प्रश्नसंख्या | प्रश्न | उत्तरसंकेतः |
| --- | --- | --- |
| प्रश्नः-१ | अधिहरि इत्यत्र अव्ययं विभक्तिसमीपसमृद्धि० इति सूत्रेण कस्मिन्नर्थे अव्ययीभावसमासः विधीयते?<br>(A) समीपार्थे (B) विभक्त्यर्थे (C) समृद्ध्यर्थे (D) अभावार्थे | |
| प्रश्नः-२ | व्यूढोरस्कः इत्यत्र कः समासः?<br>(A) तत्पुरुषः (B) बहुव्रीहिः (C) द्वन्दः (D) अव्ययीभावः | |
| प्रश्नः-३ | अधिवसति वैकुण्ठं हरिः इत्यत्र कर्मसञ्ज्ञाविधायकं सूत्रं किम्?<br>(A) कर्त्तुरीप्सिततमं कर्म (B) कर्मणि द्वितीया<br>(C) अधिशीङ्स्थासां कर्म (D) उपान्वध्याङ्वसः | |
| प्रश्नः-४ | व्याकरणाध्ययनस्य सप्तमं गौणप्रयोजनं किम्?<br>(A) यो वा इमाम् (B) अविद्वान्सः (C) चत्वारि (D) विभक्तिं कुर्वन्ति | |
| प्रश्नः-५ | जन्मादयः विकाराः कति सन्ति?<br>(A) चत्वारः (B) पञ्च (C) षट् (D) सप्त | |
| प्रश्नः-६ | अहो दुरन्ता बलवद्विरोधिता इति सूक्तिं कः वदति?<br>(A) भीमः (B) युधिष्ठिरः (C) वनेचरः (D) दुर्योधनः | |
| प्रश्नः-७ | हिरण्यगर्भाङ्गभूः इति शब्दस्य कः अर्थः?<br>(A) सुवर्णम् (B) धेनुः (C) ब्रह्मा (D) नारदः | |
| प्रश्नः-८ | द्वौ क्वौ महदन्तरं किं सूचयतः?<br>(A) सादृश्यम् (B) अविरोधम् (C) अभेदम् (D)महदन्तरम् | |

प्रश्नः-९ करुणरसस्य स्थायिभावः कः

(A) हासः (B) शोकः (C) उत्साहः (D) वात्सल्यम्

प्रश्नः-१० निपीय इति शब्दे कः धातुः?

(A) पिब (B) पा (C) पीङ् (D) पूञ्

प्रश्नः-११ नलचम्पूग्रन्थस्य रचयिता कः?

(A) बाणभट्टः (B) त्रिविक्रमभट्टः (C) नारायणभट्टः (D) महिमभट्टः

प्रश्नः-१२ उपोढरागेण विलोलतारकमिति पद्ये कः अलङ्कारः?

(A) अपह्नुतिः (B) उत्प्रेक्षा (C) समासोक्तिः (D) विभावना

प्रश्नः-१३ काव्यप्रकाशानुसारं शब्दः कतिविधः?

(A) द्विविधः (B) त्रिविधः (C) पञ्चविधः (D) सप्तविधः

प्रश्नः-१४ मुखसन्धौ कति अङ्गानि भवन्ति ?

(A) द्वादश (B) त्रयोदश (C) सप्तदश (D) अष्टादश

प्रश्नः-१५ प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः इति पद्ये किं छन्दः?

(A) मन्दाक्रान्ता (B) वसन्ततिलका (C) शिखरिणी (D) आर्या

प्रश्नः-१६ श्रीमद्भागवतमहापुराणानुसारम् ऋषभदेवस्य पत्न्याः नाम किम्?

(A)सुकन्या (B) देवहूतिः (C) जयंती (D) तिलोत्तमा

प्रश्नः-१७ श्रीमद्भागवतमहापुराणे नवयोगीश्वराः कस्मै ब्रह्मोपदेशं ददति?

(A) देवर्षिनारदाय (B) निमिराज्ञे (C) वसुदेवाय (D) उद्धवाय

प्रश्नः-१८ श्रीमद्भागवतमहापुराणे मित्रासुतः कोऽस्ति?

(A) विदुरः (B) सूतपुराणी (C) उद्धवः (D) मैत्रेयः

प्रश्नः-१९ कौटिल्यार्थशास्त्रे प्रथमाधिकरणे कति अध्यायाः सन्ति?

(A) १९ (B) २१ (C) १५ (D) २०

प्रश्नः-२० पञ्च संस्थाः प्रकीर्तिताः इति विनायाधिकारिके कस्य अध्यायस्य वाक्यांशः?

(A) एकादशाध्यायस्य (B) द्वादशाध्यायस्य

(C) दशामाध्यायस्य (D) सप्तदशाध्यायस्य

प्रश्नः-२१ याज्ञवल्क्यस्मृतौ व्यवहाराध्याये प्रथमप्रकरणस्य नाम किम्?

(A) स्वामीपालविवादप्रकरणम् (B) विक्रियासंप्रदानप्रकरणम्

(C) साधारणव्यवहारमातृकाप्रकरणम् (D) सीमाविवादप्रकरणम्

प्रश्नः-२२ तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः।

धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः।।

कस्य प्रकरणस्य श्लोकोऽयम्?

(A) दिव्यप्रकरणस्य (B) साक्षिप्रकरणस्य

(C) अग्निविधेः (D) सीमाविवादप्रकरणस्य

प्रश्नः-२३ श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।

मनुस्मृतौ कस्याध्यायस्य श्लोकांशोऽयम्?

(A) प्रथमाध्यायस्य (B) द्वितीयाध्यायस्य'

(C) सप्तमाध्यायस्य (D) न कस्यापि

प्रश्नः-२४ मनुस्मृतौ द्वितीयेऽध्याये कति श्लोकाः सन्ति?

(A) २४९ (B) ११९ (C) ३२० (D) २८०

प्रश्नः-२५ भागवते विसर्गलीलानाम्नः कः स्कन्धः ?

(A) ३ (B) ४ (C) ५ (D) ६

प्रश्नः-२६ निरुक्तानुसारं भावविकाराः भवन्ति –

(A) नव (B) अष्ट (C) सप्त (D) षट्

प्रश्नः-२७ 'विद्ययामृतमश्नुते' – इति मन्त्रांशः कस्यामुपनिषदि मिलति ?

(A) कठोपनिषदि (B) ईशावास्योपनिषदि

(C) केनोपनिषदि (D) प्रश्नोपनिषदि

प्रश्नः-२८ 'जातवेदः' इति पदेन कः सम्बोध्यते ?

(A) अग्निः (B) इन्द्रः (C) वायुः (D) आदित्यः

प्रश्नः-२९ 'जर्भरी' इति शब्दस्य कोऽर्थः ?
(A) भर्त्तारौ (B) हन्तारौ (C) कर्त्तारौ (D) दातारौ

प्रश्नः-३० ऋग्वेदप्रातिशाख्यस्य रचयिता ----- ।
(A) सायणः (B) शौनकः (C) कात्यायनः (D) हलायुधः

प्रश्नः-३१ निरुक्तस्य तृतीयकाण्डस्य नाम किमस्ति ?
(A) नैघण्टुककाण्डम् (B) दैवतकाण्डम्
(C) नैगमकाण्डम् (D) तन्त्रकाण्डम्

प्रश्नः-३२ कर्म चोदना ब्राह्मणानि ब्राह्मणशेषो भवति ---------- ।
(A) मन्त्रभागः (B) आरण्यकम् (C) ब्राह्मणग्रन्थः (D) अर्थवादः

प्रश्नः-३३ राजाहरिश्चन्द्रस्य राजसूययागे अध्वर्युः कः आसीत् ?
(A) विश्वामित्रः (B) जमदग्निः (C) वसिष्ठः (D) वामदेवः

प्रश्नः-३४ शुक्लयजुर्वेदस्य प्रथमाध्याये वर्णनमस्ति ------ ।
(A) दर्शपूर्णमासस्य (B) चितियागस्य (C) अश्वमेधस्य (D) अग्निहोत्रस्य

प्रश्नः-३५ 'जैमिनीयब्राह्मणम्' – इत्यस्य सम्बद्धः केन वेदेन सह वर्तते ?
(A) ऋग्वेदेन (B) यजुर्वेदेन (C) सामवेदेन (D) अथर्ववेदेन

प्रश्नः-३६ अयं केवलान्वयिहेतुरस्ति -----------------------------------------------
(A) धूमः (B) वह्निः (C) प्रमेयत्वम् (D) गन्धवत्त्वम्

प्रश्नः-३७ धारण-ध्यान-समाधीनामेकत्रस्थितिः किमुच्यते -------------------------
(A) परिणामः (B) अन्तःकरणम् (C) प्रज्ञा (D) संयमः

प्रश्नः-३८ सत्कार्यवादनिरूपणाय हेतुरयमुपयुज्यते----------------------------------
(A) असदकरणात् (B) शक्तस्य शक्यकरणात्
(C) सर्वसम्भवाभावात् (D) सर्वमपि

प्रश्नः-३९ 'तत्त्वमसि' महावाक्यम् अस्य वेदस्य वर्तते ------------------------------
(A) ऋग्वेदस्य (B) यजुर्वेदस्य
(C) सामवेदस्य (D) अथर्ववेदस्य

प्रश्नः-४० शमादिषट्सम्पत्तौ अयं नास्ति-------------------------------------------

(A) समाधिः (B) सम्बन्धः (C) श्रद्धा (D) तितिक्षा

प्रश्नः-४१ पीलुपाकवादिनः एते सन्ति ---------------------------------------------

(A) नैयायिकाः (B) वैशेषिकाः (C) साङ्ख्याः (D) बौद्धाः

प्रश्नः-४२ बाह्यार्थानुमेयत्ववादिनः एते सन्ति---------------------------------------

(A) वैभाषिकाः (B) सौत्रान्तिकाः (C) योगाचाराः (D) माध्यमिकाः

प्रश्नः-४३ जैनदर्शने वादोऽयं प्रस्तावितः---------------------------------------------

(A) अनेकान्तवादः (B) स्याद्वादः (C) ख्यातिवादः (D) शून्यवादः

प्रश्नः-४४ जैमिनीयमीमांसायां सूत्रसंख्येयमस्ति-----------------------------------

(A) २,६५५ (B) २,६५६ (C) २,५४४ (D) २,६४४

प्रश्नः-४५ खण्डनखण्डखाद्यग्रन्थकर्ता अयम् --------------------------------

(A) श्रीनाथः (B) श्रीहर्षः (C) मण्डनमिश्रः (D) शङ्कराचार्यः

प्रश्नः-४६ निषेधविकल्पयोः का सञ्ज्ञा विधीयते?

(A) विभाषा (B) पदम् (C) संयोगः (D) संहिता

प्रश्नः-४७ भाववाच्ये कर्त्तरि का विभक्तिः?

(A) सप्तमी (B) द्वितीया (C) तृतीया (D) चतुर्थी

प्रश्नः-४८ परार्थाभिधानं वृत्ति: इति वृत्तिलक्षणं कुत्र न प्रवर्त्तते?

(A) जायते (B) शब्दकारः (C) धनवान् (D) राजपुरुषः

प्रश्नः-४९ एध्-धातोः लुङ्लकारस्य उत्तमपुरुषस्यैकवचने किं रूपम्?

(A) एधिषीष्ट (B) ऐधे (C) ऐधिष्ये (D) ऐधिषि

प्रश्नः-५० गोशब्दस्य द्वितीयाविभक्तेः बहुवचनरूपं किम्?

(A) गावाः (B) गाम् (C) गावः (D) गाः